# संस्कृत-वार्ता:

दिनाङ्क : 22/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी दक्षिण-अफ्रीकादेशस्य जोहान्सबर्ग-नगरे आयोजितस्य जी-विंशति: शिखरसम्मेलनस्य प्रथमं सत्रम् संबोधितवान्।
- राष्ट्रपतिः द्रौपदी मुर्मु इत्येषा अवोचत् यत् राष्ट्रस्य विकासाय जनानां कौशलस्य, बलस्य च उपयोगः अवश्यमेव करणीयम्।
- दिल्ल्यारक्षि-बलेन पाकिस्तानस्य गुप्तचर विभागे आई एस. आई. इत्यनेन सह सम्बद्धानां अन्ताराष्ट्रिय-शस्त्र-तस्कराणां समूहस्य चत्वारः संदिग्धाः निगडिताः।
- सरदार वल्लभभाई पटेलस्य सार्धैकशततमे जन्मदिवसस्य संस्मरणे अद्य नवदिल्ल्यां केन्द्रीयमन्त्रिणा तथा भाजपेति दलस्य अध्यक्षेण जेपी नड्डा इत्यनेन सरदार@150 एकतामार्च इति यात्रां हरितध्वजं प्रदर्शितम्।
- गुवाहाट्याः बारसापाड़ा क्रिकेट क्रीडांगणे भारतं विरुध्य द्वितीयांतिमायाः क्रिकेट निकष स्पर्धायाः प्रथमे दिवसे दक्षिण अफ्रीका दलेन षड् क्रीडकानां हानि पुरस्सरं सप्तचत्वारिंशदधिकद्विशत धावनांकानि समर्जितानि ।

---

<u>प्रधानमंत्री जी-20 सम्मेलन</u>

प्रधानमन्त्री नरेन्द्रमोदी दक्षिण-अफ्रीकादेशस्य जोहान्सबर्ग-नगरे आयोजितस्य जी-विंशति: शिखरसम्मेलनस्य प्रथमं सत्रम् संबोधितवान्। अफ्रीका-देशे प्रथमवारं जी-विंशति शिखरसम्मेलनस्य आतिथेयानन्तरं, श्रीमोदीः अवदत् यत् वैश्विकविकासस्य मानदण्डानां पुनरवलोकनस्य, सर्वसमावेशस्य सुस्थिरतायाः च वृद्ध्यै प्राथमिकतायाः च कृते इदमेव उचितः समयः अस्ति। सः अवदत् यत् भारतस्य सभ्यतायाः मूल्यानि, विशेषतः एकीकृत-मानवतावादस्य सिद्धान्तः, अग्रे गन्तुं सार्थकमार्गं प्रदर्शयति। प्रधानमन्त्रिणा स्वास्थ्य-आपत्कालेषु प्राकृतिक-आपत्सु च संयुक्तरूपेण कार्यं कुर्वन् विश्वं सुदृढं कर्तुं जी-विंशति: वैश्विक-स्वास्थ्य-सेवा-प्रतिक्रिया-

दलस्य निर्माणस्य प्रस्तावोपि प्रदत्तम्। सः अवदत् यत् तेषां प्रयासः जी-विंशति: सदस्यराष्ट्राणां प्रशिक्षित-चिकित्सकीय-विशेषज्ञ-दलानां निर्माणाय भवेत्, ये कस्यापि आपत्काले द्रुतगत्या नियोजनार्थं तत्पराः भवेयुः। मादकद्रव्याणां व्यापारस्य, मुख्यतया फेण्टानिल् सदृशानां घातक-पदार्थानां प्रसारस्य वर्धमानप्रतिसन्धिं निवारयितुं, प्रधानमन्त्री मादकद्रव्याणां भयोत्पादनस्य नेक्सस् इत्यस्य शमनार्थं जी-विंशति: उपक्रमस्य प्रस्तावः प्रदत्तवान्।

प्रधानमन्त्रिणा जी-विंशति: अफ्रीका:-कौशल-गुण-उपक्रमस्य अपि प्रस्तावः प्रदत्तः येन आगामि-दशके अफ्रीका-देशे दशलक्षं यावत् प्रमाणित-प्रशिक्षकाः प्रशिक्षिताः भविष्यन्ति, येन स्थानीय-क्षमता, दीर्घकालिक-विकासः च वर्धते।

श्रीमोदिना जी-विंशति: इत्यस्य अन्तर्गतं वैश्विक परम्परागतज्ञानसञ्चयस्य प्रस्तावोपि प्रदत्तम्। भारतीय-ज्ञान-परम्परया प्रेरितस्य अस्य उपक्रमस्य उद्देश्यम् आगामि संततिं प्रति सुस्थिरं ज्ञानम् प्रदानं वर्तते ।

---------------------------------------------------------------------------

## राष्ट्रपति-आन्ध्र प्रदेश

राष्ट्रपतिः द्रौपदी मुर्मु इत्येषा अवोचत् यत् नागरिकाणां जीवनस्य उन्नत्यै सर्वकारः नैकानि उपायानि करोति। सा अवधानं दत्तवती यत् राष्ट्रस्य विकासाय जनानां कौशलस्य, बलस्य च उपयोगः अवश्यमेव करणीयम् । अद्य राष्ट्रपतिः भगवत: श्री सत्यसाईं बाबा वर्यस्य शतवार्षिकस्य उपलक्ष्ये पुट्टपर्थी-नगरस्य प्रशान्ति निलयम्-इत्यत्र विशेषसम्मेलनम् संबोधयन्ति आसीत्। सा सांई-कुलवन्त-सभामण्डपे श्री-सत्य-सांई-बाबा वर्यम् श्रद्धाञ्जलिम् समर्पितवती। सा अवोचत् यत्, सर्वेषाम् सामूहिक-प्रयासेण एव सप्तचत्वारिंशोत्तर द्विसहस्रतमवर्षपर्यन्तं भारतं विकसितभारतं भवितुं शक्नोति इति।

---------------------------------------------------------------------------

## दिल्ली-आईएसआई

दिल्ल्यारक्षि-बलेन पाकिस्तानस्य गुप्तचर विभागे आई एस. आई. इत्यनेन सह सम्बद्धानां अन्ताराष्ट्रिय-शस्त्र-तस्कराणां समूहस्य चत्वारः संदिग्धाः निगडिताः। समन्वितकार्यक्रमे अपराध शाखया दश अत्याधुनिकानि पिस्तौल इति भुशुण्डी अस्त्राणि प्राप्तानि, येषु तुर्की-देशे निर्मितानि पञ्च, चीनदेशे निर्मितानि त्रीणि च सन्ति। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन्, अपराध शाखयाः संयुक्त-आरक्षकायुक्तः सुरेन्दरकुमारः अवदत् यत्, एते कुख्यात-अपराधिभ्यः शस्त्राणां आपूर्तिं कुर्वन्तः आसन्।

------------------------------------------------------------------------

नड्डा एकता यात्रा

सरदार वल्लभभाई पटेलस्य सार्धैकशततमे जन्मदिवसस्य संस्मरणे अद्य नवदिल्ल्यां केन्द्रीयमन्त्रिणा तथा भाजपेति दलस्य अध्यक्षेण जेपी नड्डा इत्यनेन सरदार@150 एकतामार्च इति यात्रां हरितध्वजं प्रदर्शितम्। आयोजनं सम्बोधयन् श्रीनड्डा वर्येण उक्तं यत् सरदारपटेलस्य रिक्थं सम्मान-प्रदानाय देशे सर्वत्र आयोजनानां श्रृङ्खला आयोजिताः सन्ति। श्रीनड्डा अवदत् यत् सरदारपटेलस्य जन्मस्थाने देशस्य विभिन्नप्रदेशेभ्यः पञ्च शोभायात्राः समागमिष्यन्ति। ततः गुजरातस्य केविडियानगरं प्रति दशदिवसीया पदयात्रा आरभ्यते। तेनोदीरितं यत् एकं भारतं, श्रेष्ठं भारतं, विकसितभारतं, आत्मानिर्भरभारतं प्रति राष्ट्रस्य नेतृत्वं कर्तुं यूनः प्रेरयितुं सरदार पटेलाय श्रद्धाञ्जलिः अस्ति।

------------------------------------------------------------------------

रक्षा-एनसीसी

प्रशासनं राष्ट्रियकैडेट्कोर-एनसीसी इत्यस्य सामर्थ्यं वर्धयितुं योजनां विनिर्माति। सप्तदश लक्षात् विंशतिः लक्षं यावत् क्षमतायाः संवर्धनं सहैव राष्ट्रियविकाससुरक्षयोः च योगदानं कर्तुं विविधकार्यक्रमेषु तस्य भूमिकायाः विस्तारं कर्तुं लक्ष्यं निर्धारितं अस्ति। रक्षासचिवः राजेशकुमारसिंहः अष्टसप्ततितमस्य राष्ट्रिय-कैडेट्-कोर दिवसावसरे नव दिल्ल्यां राष्ट्रिय-युद्ध-स्मारके श्रद्धा-कुसुमाञ्जलिं समर्प्य एतत् प्रोक्तवान् । श्रीसिंहः अवदत् यत् एतत् जनसांख्यिकीयः

लाभांशः देशस्य प्रगतेः प्रमुखा शक्तिः अस्ति। सः अवदत् यत् एनसीसी देशस्य यूनां शक्तेः, क्षमतायाः च सुदृढं उदाहरणम् अस्ति। एनसीसी इत्यस्य-निदेशकः जनरल् लेफ्टिनेंट वीरेन्द्रः वत्सः प्रोक्तवान् यत् सम्पूर्णे भारते एन सी सी इत्यस्याः संस्थायाः सप्तशताधिकाः प्रभागाः सन्ति।

---

## इफ्फी

भारतस्य षड्पञ्चाशत्तमस्य अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्यांशरूपेण, केन्द्रीय-सञ्चार-विभागः, देशस्य षोडश राज्येषु जीवन्त-लोक-कला-प्रदर्शनानि इफ्फी इत्यत्र आनयत्। लोककलाकाराः मुक्तप्रदर्शन-क्षेत्रे स्वपरम्परागतनृत्यानि, सांस्कृतिक-भावान् च प्रदर्शयन्ति, येन आगन्तुकानां कृते देशस्य समृद्ध-परम्परायाः दर्शनं भवेत्।

---

## श्रम संहिता - पुनर्विचार

विविधानां क्षेत्राणां उद्योगजगतः नेतारः देशे चतुर्णां श्रमसंहितानां कार्यान्वयनम् आधुनिक-अर्थव्यवस्थायाः कृते आवश्यकम् इति वर्णितवन्तः। एतेन प्रयासेण औपचारिक वृत्त्यवसराणां संवर्धनं प्रवर्धयिष्यति। सामाजिकसुरक्षायाः व्याप्तिः संवर्धयिष्यति, अपि च अनुपालनं सुचारुरूपेण भविष्यति। भारतीय ट्रेड यूनियन राष्ट्रीय मोर्चा-एन.एफ.आई.टी.यू NFITU इत्यस्य अध्यक्षः डॉ. दीपक जायसवालः अवदत् यत् असंगठितक्षेत्रे प्रायः पञ्चाशत्कोटिजनाः नियोजिताः सन्ति तथा च नूतनश्रमसंहितानां कार्यान्वयनेन सह तेषां न्यूनतमः आयः पूर्णतया सुनिश्चितं भविष्यति।

भारतीय-श्रमिक-संघेन चतुर्णां नवीन-श्रम-संहितानां कार्यान्वयनस्य स्वागतं कृतमस्ति। बीएमएस- इत्यस्य राष्ट्रीयसचिवः गिरीश-आर्यः अवदत् यत् एषः निर्णयः स्वातन्त्र्यानन्तरं आरभ्य श्रमिकाणां हिताय स्वीकृतः अयं निर्णयः एव बृहत्तमः परिष्कारः अस्ति।

प्रशासनेन चतुर्णां नूतनानां श्रमसंहितानां कार्यान्वयनस्य घोषणा कृता, येषां उद्देश्यं देशस्य पुरातनां विद्यमानानाम् विधिनियमानां सरलीकरणं सुव्यवस्थितं च कर्तुं वर्तते । श्रम-मन्त्रालयेन उक्तं यत् नूतनाः श्रमसंहिता: देशस्य कृते उत्तमां वृत्तिं, सुरक्षां, सामाजिकसुरक्षां कल्याणं च सुनिश्चितं करिष्यन्ति।

---

**क्रिकेट**

गुवाहाट्याः बारसापाड़ा क्रिकेट क्रीडांगणे भारतं विरुध्य द्वितीयांतिमायाः क्रिकेट निकष स्पर्धायाः प्रथमे दिवसे दक्षिण अफ्रीका दलेन षड् क्रीडकानां हानि पुरस्सरं सप्तचत्वारिंशदधिकद्विशत धावनांकानि समर्जितानि । इतः पूर्वं दक्षिण अफ्रीकादलेन पणकं विजित्य प्रथमं क्रीडनस्य निर्णयः स्वीकृतः। ध्यातव्यमस्ति यत् दक्षिण अफ्रीका दलेन प्रथमायां क्रिकेट निकष स्पर्धायां भारतीयदलं पराजितमासीत्।

**।। इति वार्ताः ।।**